# आदर्शपाठयोजना (2023-24)
# (संस्कृत-पद्यशिक्षणम्)

| | | |
|---|---|---|
| **विषयः - संस्कृतम्** | **कालांशः - चतुर्थः** | **कक्षा - द्वादशी** |
| **पाठस्य नाम - "सुभाषितानि"** | **अवधिः - 40 निमेषाः** | **दिनाङ्कः - 28.03.23** |

## 1. अधिगमस्य प्रतिफलानि –

i. छात्रेषु संस्कृतकाव्यं प्रति रुच्युत्पादनम्।
ii. छात्रेषु कोमलभावानां विकासकरणम्।
iii. छात्रेषु संस्कृतपद्यांशस्य अर्थग्रहणक्षमतायाः विकासकरणम्।
iv. छात्रेषु श्रवणस्य भाषणस्य पठनस्य लेखनस्य चेतेषां चतुर्णां भाषिककौशलानां विकासकरणम्।
v. छात्राणां शब्दभण्डारस्य अभिवर्द्धनम्।
vi. छात्रेषु लिपिज्ञानवर्द्धनम्।
vii. छात्रेषु पद्यगतभावानाम् अवबोधनक्षमतायाः विकासकरणम्।

## 2. अनुदेशात्मकानि उद्देश्यानि –

**ज्ञानात्मकपक्षः –**

i. **'कर्मगौरवम्'** इत्यनेन पाठमाध्यमेन छात्राः संस्कृतशब्दार्थान् ज्ञात्वा तेषां प्रयोगे समर्थाः भविष्यन्ति।
ii. **'कर्मगौरवम्'** इत्यस्मिन् पाठे निहितभावान् स्वजीवने प्रयुक्तान् करिष्यन्ति।

**बोधात्मकपक्षः –**

i. छात्राणां **'कर्मगौरवम्'** इत्यनेन पाठमाध्यमेन कर्मभावनां प्रति सकारात्मकाभिवृद्धेः जागरणम्।
ii. छात्राः श्लोकानां माध्यमेन ज्ञास्यन्ति यद् अस्माकं जीवने कर्मणः कियत् महत्त्वम् अस्ति।

**प्रयोगात्मकपक्षः –**

i. छात्राः **'कर्मगौरवम्'** इत्यस्मिन् पाठे निहितभावान् स्वजीवने प्रयुज्य स्वजीवने परिवर्तनं करिष्यन्ति।
ii. ते सर्वदा निष्कामभावनया कर्माणि कृत्वा जीवने सफलाः च भविष्यन्ति।

**सृजनात्मकपक्षः –**

i. छात्रेषु संस्कृतपद्यानाम् अर्थग्रहणक्षमतायाः विकासः भविष्यति।
ii. छात्राः **'कर्मगौरवम्'** इत्यस्य पाठस्य सुभाषितपद्यानां माध्यमेन स्वजीवनं रसमयम् आनन्दमयं च करिष्यन्ति।

## 3. शिक्षणविधयः -

व्याख्यानविधिः | वर्णनविधिः | समस्यानिदानात्मकविधिः
प्रश्नोत्तरविधिः | विश्लेषणविधिः

## 4. शिक्षणाधिगमसामग्री -

शयामपट्टः | सुधाखण्डः | मार्जनी
पाठ्यपुस्तकम् | सङ्केतकः

## 5. पूर्वज्ञानानुमानम् -

छात्राः '**कर्मगौरवम्**' इत्यस्मिन् विषये पूर्वमेव किञ्चित् जानन्ति एव।

## 6. पूर्वज्ञानपरीक्षणम्

| अध्यापकस्य क्रियाः | छात्राणां क्रियाः |
|---|---|
| 1. संस्कृतसाहित्ये प्रसिद्धग्रन्थाः के? | रामायणम् , महाभारतम् , श्रीमद्भगवद्गीता |
| 2. श्रीमद्भगवद्गीतायां मुख्यरूपेण कस्य प्रधानता वर्णिताअस्ति? | कर्मणः |
| 3. अस्माकं जीवने कर्मणां महत्त्वं किम्? | छात्राः निरुत्तराः (समस्यात्मकः प्रश्नः) |

## 7. उद्देश्यकथनम् -

अद्य वयं "**कर्मगौरवम्**" इत्यस्य पाठस्य अध्ययनं करिष्यामः।

## 8. प्रस्तुतीकरणम् -

| शिक्षणबिन्दवः | अध्यापकस्य क्रियाः | छात्राणां क्रियाः | श्यामपट्टकार्यम् |
|---|---|---|---|
| आदर्शवाचनम् | मूलपाठस्य सस्वरगानं करिष्यति। 1. बुद्धियुक्तो जहातीह ........... कौशलम्।। 2. नियतं कुरु .................. प्रसिद्ध्येदकर्मणः।। | छात्राः ध्यानेन शृण्वन्ति। | पाठ-4, "**कर्मगौरवम्**" |
| अनुकरणवाचनम् | अध्यापकः छात्रान् समुचितरूपेण गति-यति-लयानुसारं पद्यस्य अनुवाचनं कर्तुं कथयिष्यति। | छात्राः निर्देशानुसारं पद्यस्य अनुवाचनं कुर्वन्ति। | |
| अशुद्धेः संशोधनम् | अध्यापक अनुवाचनसमये छात्रै उच्चारितानाम् अशुद्धशब्दानां संशोधनं छात्राणां सहायतया श्यामफलके लिखित्वा वाचयित्वा च करिष्यति। | छात्राः शुद्धशब्दानाम् अनुवाचनं कृत्वा उत्तरपुस्तिकायां स्वप्रतिलेखस्योपरि लिखन्ति। | तस्माद्योगाय ह्यकर्मणः |

| | | | |
|---|---|---|---|
| **काठिन्यनिवारणम्** | अध्यापकः पद्येषु विद्यमानानां कठिनपदानां क्रमेणार्थावबोधनं कारयिष्यति । श्यामफलके अपि सन्धिच्छेदं कृत्वा लेखिष्यति।<br><br>अध्यापकः कक्षायां भ्रमित्वा छात्राणां सहभागितां सुनिश्चितां करिष्यति लिखितकार्यस्य च निरीक्षणं करिष्यति। | छात्राः ध्यानेन स्वप्रतिलेखस्योपरि लिखन्ति। | **ह्यकर्मणः** = हि + अकर्मणः (यतोहि कर्म न करणात्)<br>**ज्यायः** = श्रेष्ठः<br>**युज्यस्व** = प्रयत्नं कुरु |
| **बोधप्रश्नाः** | 1. कः कर्मसु कौशलम्?<br>2. कः उभे सुकृतदुष्कृते जहाति?<br>3. नियतं किं करणीयम्?<br>4. अकर्मणः किं ज्यायः?<br>5. अकर्मणः का न प्रसिद्ध्येत्? | 1. योगः<br>2. बुद्धियुक्तः<br>3. कर्म<br>4. कर्म<br>5. शरीरयात्रा | |
| **मौनवाचनम्** | अध्यापकः छात्रान् पद्यानां मौनवाचनं कर्तुं कथयिष्यति। | छात्राः मौनवाचनं करिष्यन्ति। | |
| **भाषानुवादः** | **श्लोकः 1-** हे अर्जुन! समत्व बुद्धियुक्त मनुष्य इस संसार में पुण्य और पाप दोनों प्रकार के कर्मों में आसक्ति को छोड़ देता है। इसलिए तू समत्व योग के लिए प्रयत्न कर। कर्मों में कुशलता का नाम ही योग है। अर्थात् कर्मबन्धन से छूटने का उपाय है।<br><br>**श्लोकः 2-** हे अर्जुन ! तुम शास्त्रविहित कर्म करो, क्योंकि कर्म न करने से कर्म करना श्रेष्ठ है। बिना कर्म किए हुए तुम्हारे लिए, शरीर निर्वाह भी सिद्ध नहीं होगा। | छात्राः ध्यानेन शृण्वन्ति अवगच्छन्ति च। | |
| **9. पुनरावृत्तिकार्यम् –**<br><br>प्रश्न 1. एषः पाठः कस्मात् ग्रन्थाद् उद्धृतः?<br>प्रश्न 2. **‘कर्मगौरवम्’** इत्यस्मिन् पाठे कस्य वर्णनम्?<br>प्रश्न 3. **'कर्मसु'** इत्यस्मिन् शब्दे का विभक्तिः?<br>प्रश्न 4. **‘कुरु’** इत्यस्मिन् शब्दे कः लकारः प्रयुक्तः?<br>प्रश्न 5. **'जहातीह'** इत्यस्य शब्दस्य कः सन्धिच्छेदः? | | 1. श्रीमद्भगवद्गीता-ग्रन्थात्।<br>2. कर्मणां महत्त्वम् ।<br>3. सप्तमीविभक्तिः।<br>4. लोट् लकारः।<br>5. जहाति + इह। | |

## 10. गृहकार्यम् -

1) **‘कर्ममहत्त्वम्’** इति वर्णयन्तः द्वौ श्लोकौ लिखित्वा तयोः भावार्थं स्वभाषया लिखत।
2) कर्मणः महत्त्वस्य विषये पञ्चवाक्यानि रचयत।
3) निम्नशब्दयोः पर्यायपदानि पाठात् चित्वा लिखत – नियतम् , बुद्धियुक्तः।
4) संधिच्छेदं कुरुत - ह्यकर्मणः, जहातीह।
5) **'योगाय'** इत्यस्मिन् शब्दे का विभक्तिः?

## सन्दर्भः –

**"कर्मगौरवम्"** अयं पाठः हरियाणा-विद्यालय-शिक्षा-बोर्डतः प्रमाणितात् एकादश्याः कक्षायाः **'शाश्वती भाग-2'** पाठ्यपुस्तकाद् उद्धृतः।